# DAV PUBLIC SCHOOL AIROLI
## SUB: SANSKRIT SAMPLE PAPER
**Class: IX** **2024-25**

---

**सामान्यनिर्देशा: -**

**1 अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति।**

| | | | |
|---|---|---|---|
| खण्ड: -क - | अपठित अवबोधनम् - | 10 अङ्काः |
| खण्ड: -ख - | रचनात्मककार्यम् - | 15 अङ्काः |
| खण्ड: -ग - | अनुप्रयुक्त-व्याकरणम् - | 25 अङ्काः |
| खण्ड: -घ - | पठित अवबोधनम् - | 30 अङ्काः |

**2. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण लेखनीयानि।**

**3.प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।**

**4. प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यं लेखनीया।**

**5. प्रश्नपत्रे उत्तराणि न लेखनीयानि।**

**6. खण्डक्रम: अपि लेखनीय:।**

**7. प्रश्नानां निर्देशा: ध्यानेन अवश्यं पठनीया: ।**

## खण्ड– क (अपठित-अवबोधनम्)

**प्रश्न:-1 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** **10**

अस्माकम् देशः प्राचीनकालादेव प्राकृतिक पर्यावरणस्य पोषकः। वैदिककाले यद्यपि पर्यावरणस्य प्रदूषणस्य समस्या नासीत् तथापि वेदेषु स्थाने-स्थाने ऋषीणां पर्यावरणविषयकं चिन्तनं दृश्यते। अद्य पर्यावरण-प्रदूषणं संसारस्य भीषणतमा समस्या वर्तते, परं जनाः अस्याः गाम्भीर्यं न अनुभवन्ति। पर्यावरणं रक्षणीयं वृक्षाः रोपणीयाः रक्षणीयाः च इति शृण्वन्तः उद्घोषयन्तः अपि वयं प्रतिदिनं तेषां कर्तनं पश्यामः। 'प्लास्टिक' इति रसायनेन निर्मितवस्तूनि पर्यावरणाय हानिकराणि इति जानन्तः अपि जनाः एतेषां प्रयोगं बाहुल्येन कुर्वन्ति । पर्यावरणप्रदूषकं धूमं क्षिपतां वाहनानाम् औद्योगिक-यन्त्रागाराणां सङ्ख्या निरन्तरं वर्धमाना अस्ति। यद्यपि 'विकासाय नवीनाः आविष्काराः, अपेक्षिताः परं सञ्चाराय विस्तृताः सुरक्षिताः मार्गाः जनानां कृते अपि आवश्यकाः एव।यदि पर्यावरणं प्राणिजीवनाय अनुकूलं न भविष्यति तर्हि पृथिव्यां जीवनमेव असम्भवं भविष्यति तदा भौतिकनिकासेन किम्? अतः सर्वकारः जनसहयोगेन सर्वथा पर्यावरणरक्षणाय यत्नशीलः भवेदिति ।

**I. एकपदेन उत्तरत (केवलं प्रश्नद्वयम् )** **1×2=2**

(क) के रोपणीयाः रक्षणीयाः च ?

(ख) कदा पर्यावरणस्य प्रदूषणस्य समस्या नासीत् ?

(ग) अस्माकं देशः कस्य पोषकः ?

**II. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम् )** **2×2=4**

**आ. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम् )** **2x2-4**

(क) किं जानन्तः जनाः प्लास्टिक निर्मितवस्तूनां प्रयोगं बाहुल्येन कुर्वन्ति ?

(ख) यदि पर्यावरणं प्राणिजीवनाय अनुकूलं न भविष्यति तर्हि किं भविष्यति ?

(ग) केषां सङ्ख्या निरन्तरं वर्धमाना अस्ति ?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **1×1=1**

**IV.यथानिर्देशम् उत्तरत (केवलं प्रश्नत्रयम् )** **1×3=3**

(I) **''जनाः अस्याः गाम्भीर्यं न अनुभवन्ति'** अत्र किं क्रियापदम् ?

(क ) जनाः (ख) अत्र (ग) अस्याः (घ) अनुभवन्ति

(II) **'नवीनाः'** इति विशेषणपदस्य विशेष्यपदं किम् ?

(क ) जनाः (ख) आविष्काराः (ग) अपेक्षिताः (घ) मार्गाः

(III) **'शोषकः'** इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(क ) चिन्तनीयः (ख) विषयः (ग) सरलः (घ) पोषकः

(IV) **'वयं प्रतिदिनं तेषां कर्तनं पश्यामः ।'** अस्मिन् वाक्ये **'पश्यामः'** क्रियायाः कर्तृपदं किं प्रयुक्तम् ?

(क ) वयम् (ख) तेषाम् (ग) प्रतिदिनम् (घ) कर्तनम्

**खण्ड-ख रचनात्मक-कार्यम् 15 अङ्काः**

**2. भवती प्रभा अस्ति । स्वमातरं प्रति स्वस्वास्थ्यविषये लिखितम् इदं पत्रं मञ्जूषायाः सहायतया पुनः सम्पूर्णं लिखतु ।** **½ x10=5**

(i) -------------

विद्यालयपरिसरः

समादरणीयाः (ii) ------------- सादरं प्रणामाः ।

अत्र कुशलं तत्रास्तु । सम्प्रति मम (iii) -------------- परीक्षा सञ्चरति। अत्र छात्रावासे पठनस्य वातावरणं तु शोभनं वर्तते । अत्र अध्यापकाः अपि च अतीव कर्मठाः सन्ति । अतः पठनस्य कार्यं (iv) -------------- एव भवति, परन्तु अध्ययनकारणात् शयनस्य भोजनस्य च (v) --------------- एव न प्राप्यते । अतः अद्यत्वे मम (vi)--------- सुष्ठु नास्ति । अहं (vii)----------- पीडिता अस्मि। परं काचिद् अपि (viii) ------------ नैव करणीया। आशासे अहं शीघ्रमेव पूर्णतया स्वस्था भविष्यामि। परीक्षायाः अनन्तरं (ix) ---------------- आगमिष्यामि। तदा वयं मिलित्वा भ्रमणाय वाराणसीनगरं गमिष्यामः। पित्रे (x)------------

भवत्याः पुत्री प्रभा

**मञ्जूषा-**

| |
|---|
| **वार्षिकी, शिमलातः, ज्वरेण, मातृचरणाः, गृहम्, स्वास्थ्यम्,समुचितम्, नमः, समयः, चिन्ता** |

3. **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पंञ्च वाक्यानि संस्कृतेन लिखत ।**

**5×1-5**



**मञ्जूषा- पर्वतीयस्थलम्, अनेके जनाः, द्विचक्रिकाभिः, वेशभूषा, शिरस्त्राणानि, प्राकृतिकं, दृश्यते, हरिता भूमिः, वायुयानम्, वृक्षाः, लताः चालयन्ति, भवन्ति**

**अथवा**

**निम्नलिखितं विषयम् अधिकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत ।**

**'वृक्षाः अस्माकं मित्राणि'**

**मञ्जूषा- वृक्षाः, सत्पुरुषाः, परोपकारम्, छाया, फलानि, पुष्पाणि, जनाः, पवनः, काष्ठम्, शीतलः, स्वास्थ्याय, आवश्यकम्, पथिकः, आनन्दम्, अनुभवन्ति, भूमेः संरक्षणम्, वर्षा, पक्षिभ्यः वासः**

4. **अधोलिखितां कथां मञ्जूषाया: सहायतया पूरयित्वा पुन: लिखत।** **½ x10=5**

एकदा आकाशवाणी जाता यत् पञ्चवर्षाणि यावत् वर्षा न भविष्यति।एतच्छ्रुत्वा (i)---------- विचलिताः जाताः। वर्षा विना कार्यं कर्तुम् अशक्याः वयम् इति (ii) ---------------- चिन्तयित्वा प्रायशः सर्वैः कृषकैः कार्यं त्यक्तं परन्तु एकः कृषकः स्वक्षेत्रं गत्वा प्रतिदिनं कृषिकार्यं करोति स्म। तं (iii) ------------- कार्यं कुर्वन्तं दृष्ट्वा मेघमाला विस्मयेन उपेक्षया चऽकथयत्- मूर्ख ! किं त्वया (iv) ---------------- आकाशवाणी न श्रुता। यदा वर्षा एव न भविष्यति (v) --------------- पञ्चवर्षाणि चेत् तदा किमर्थं वृथा श्रमं करोषि। स्मितमानः कृषकः अवदत्- मूर्खो नास्मि, न आकाशवाण्यापरिचितः; कार्यं तु मया एतदर्थं क्रियते यत् पञ्चवर्षाणां (vi) --------------कालः सुदीर्घः। कार्यं चेत् न करिष्यामि, तर्हि अलसतया विस्मृतिवशाच्च (vii) ---------भविष्यति तु कार्यकरणे एवासमर्थः भविष्यामि, तदा संभूयमानायाः अपि (viii) ------- वर्षायाः न कश्चिद् लाभः भविष्यति मत्कृते। कृषकस्य एतां वार्तां श्रुत्वा? इति विचार्य सा तत्क्षणमेव जलम् (ix)------------ मेघमाला अचिन्तयत् यन्मया चेत् पञ्चवर्षेषु वर्षणं विस्मृतम् अवर्षत्। अतः सत्यमेव उक्तं यत् मनुष्येण स्वकर्मणा(x) -------------- एव स्वनियतिः निर्मीयते।

| मञ्जूषा– सरोवरस्य, तीव्रगत्याः, वानराः, त्यक्त्वा, वानराणाम्, पलायितः, श्रुत्वा, निर्भीकदृष्ट्या, स्वामीविवेकानन्दः, कृषकाः |
|---|

**अथवा**

**मञ्जूषायाः सहायतया अधोलिखितां कथां पूरयित्वा पुनः लिखत।**

एकदा कोऽपि बाबू वेषधारी नागरिकः नौकया नदीपारं गच्छति स्म। सः आकाशं पश्यति, नाविकं च पृच्छति-

भो नाविक! नक्षत्रविद्यां जानासि किम् ?

नाविकः(1) ---------------------------------------------------------------------------------------- ।

नागरिकः (हसन्) भो मूर्ख। तव जीवनस्य चतुर्थांशः नष्टः। गणितं पठितवान् किम् ?

नाविकः(ii) ---------------------------------------------------------------------------------------- ।

नागरिकः अरे। तव जीवनस्य अर्धं व्यर्थं जातम्। (वृक्षपंक्तिं दृष्ट्वा) वृक्षविज्ञानं जानासि ?

नाविकः (iii) ----------------------------------------------------------------------------------------।

नागरिकः हा हन्त! तव जीवनस्य त्रिचतुर्थांशः व्यर्थः गतः।

नाविकः (iv)---------------------------------------------------------------------------------------- ।

नागरिकः भोः। एषा नौका तु दोलायते। जलमपि प्रविशति। किं करोमि। तरणं न जानामि।

नाविकः (v) ----------------------------------------------------------------------------------------।

| मञ्जूषा-<br>तरणं न जानासि किल ? तर्हि नूनं तव सम्पूर्णमेव जीवनं नष्टम्।<br>गणनाम् एव जानामि, न तु गणितम्।<br>पश्यतु पश्यतु, प्रबलः वायुप्रकोपः उत्पन्नः। अहं तु कूर्दित्वा तरामि। भोः कथं वृक्षविज्ञानं जानामि। कथमपि नौकां चालयामि, उदरञ्च भरामि।<br>नहि नहि, अहं तु प्रतिदिनं तारकाणि दृष्ट्वा नमामि । |
|---|

**'ग' भाग अनुप्रयुक्त व्याकरणम् 25 अङ्काः**

**5. उच्चारणस्थानानां प्रयोगं कृत्वा निर्देशानुसारम् उत्तरत – (केवलं प्रश्नचतुष्टयम् ) ½ x4=2**

(i) कण्ठतालव्यौ कौ स्तः?

(क) ओ, औ (ख) उ, ऊ (ग) ए, ऐ

(ii) कण्ठोष्ठौ वर्णौ कौ स्तः?

(क) अ, आ (ख) उ, ऊ (ग) ओ, औ

(iii) स्, श्, ष् वर्णेषु कः वर्णः दन्त्यः अस्ति?

(क) स्  (ख) श्  (ग) ष्

(iv) कृ, प् च्, ट् एतेषु वर्णेषु तालव्यः वर्णः कः अस्ति?

(क) ट्  (ख) च्  (ग) क्

(v) "कलमः" इति पदे कस्य व्यञ्जनवर्णस्य उच्चारणस्थानं कण्ठयः अस्ति?

(क) क्  (ख) ल्  (ग) म्

**6. अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिविच्छेदं वा कुरुत |(केवलं प्रश्नचतुष्ट्यम्)  1x4=4**

(I) मुनिः **बद्ध + अञ्जलिः** गृहिणीं अवदत्।

(क) बद्धऽगञ्जलि  (ख) बद्धाञ्जलिः  (ग) बद्धञ्जलिः

(Ii) किम् त्वया सह **महा + ईशः** अपि गच्छति?

(क) महेशः  (ख) महैशः  (ग) महीशः

(iII) **मातृ + आज्ञा** सदैव पालनीया।

(क) मात्रज्ञा  (ख) मात्राज्ञा  (ग) मातृज्ञा

(iv) **अद्यैव** मरणमस्तु युगान्तरे वा।

(क) अद्या + एव  (ख) अद्य + ऐव  (ग) अद्य + एव

(v) **पो+ अन**: अति तीव्र वस्ति।

(क) पवन:  (ख) पोअन:  (ग) पेअन:

**7. अधोलिखितवाक्येषु उचितं विकल्पं चित्वा रिक्त-स्थानपूर्तिं कुरुत।(केवलं प्रश्नचतुष्ट्यम्) 1x4=4**

(i) -------------- उभयतः गोपाः सन्ति।

(क) कृष्णम्  (ख) कृष्णस्य  (ग) कृष्ण

(ii) बालिकाः ----------------- सार्धं क्रीडन्ति।

(क) बालकेभ्यः  (ख) बालकैः  (ग) बालाः

(iii) वयम् भारतीयाः अलं --------------------

(क) शत्रुभ्यः  (ख) शत्रुच्याः  (ग) शत्रून्

(iv)----------------- निकषा समुद्रः विद्यते।

(क) लंकाम्  (ख) लंका  (ग) लंकया

(v) वैभवः ---------------------- सह कविसम्मेलनं याति।

(क) कविभ्यः  (ख) कविभिः  (ग) कविम्

**8. अधोलिखितवाक्येषु उचितविभक्तियुक्तपदं विकल्पेन चित्वा रिक्तस्थानानि पूरयत।**
**(केवलं प्रश्नचतुष्ट्यम्)  1x4=4**

(i) जननी जन्मभूमिश्च --------------- अपि गरीयसी।

(क) स्वर्गस्य (ख) स्वर्गात् (ग) स्वर्गम्

(ii) अहम् -------------------- शाटिकाम् ददामि।

(क) सीता (ख) सीताम् (ग) सीतायै

(iii) ------------------ तटे उन्नताः वृक्षाः सन्ति।

(क) नद्याः (ख) स्वर्गात् (ग) स्वर्गम्

(iv) वृक्षाणाम् आरोपणम् -------------------- परमं कर्तव्यं।

(क) मह्यम् (ख) मम् (ग) अस्माकम्

(v) ------------------- पाठशालायाम् पठसि ?

(क) कस्यां (ख) कस्मिन् (ग) कस्य

**9. अधोलिखितवाक्येषु उचितधातुरूपं विकल्पेन चित्वा रिक्तस्थानानि पूरयत।(केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(i) ये वृद्धान् सेवन्ते ते नूनं एव यशः------------- ।

(क) लभन्ते (ख) लप्स्येते (ग) लभते

(ii) गुणवन्तः जनाः सफलाः ---------------------- ।

(क) भवति (ख) भवतः (ग) भवन्ति

(iii) युवां शिक्षकान् प्रश्नान्---------------- ।

(क) अपृच्छत (ख) अपृच्छतम् (ग) अपृच्छताम्

(iv) ह्य: अस्माकं गृहे विवाहोत्सवः------------- ।

(क) आसीत् (ख) आस्त (ग) अस्ति

(v) यूयम् नित्यं निर्धनान् --------------------।

(क) सेवे (ख) सेवध्वे (ग) सेवेते

**10. अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उत्तरं विकल्पेभ्य: चित्वा लिखत। |(केवलं प्रश्नचतुष्टयम् )** **1x3=3**

(i) जनाः रात्रौ भोजनं ---------------- शयनाय गच्छन्ति।

(क) कृत्वा (ख) कृत्वा (ग) कत्वा

(ii) पथिकः ------------ गङ्गाम् प्रति गच्छति।

(क) स्नातु (ख) सनतुम् (ग) स्नतुम्

(iii) कुक्कुरः -------------- अभाषत्।

(क) विलोकय (ख) विलोकल्य (ग) विलोक्य

(iv) प्रतापः सम्यरूपेण ------------- मन्त्रिणं अवदत्।

(क) विचर्य (ख) विचार्य (ग) वीचार्य

**11. अधोलिखितवाक्येषु मञ्जूषाया: सहायतया उचिताव्ययपदै: रिक्तस्थानानि पूरयत। ½ x4=2 (केवलं प्रश्नचतुष्टयम् )**

(i) ------------- त्वं चलिष्यति तदा अहं अपि चलिष्यामि।

(ii) मम अनुजः-------------- मया सह विद्यालयं गच्छति।

(iii) तव गृहं-------------- अस्ति?

(iv) यदा वसन्तः आगच्छति -------------- कोकिल: गायति।

(v) ईश्वर:-------------- अस्ति।

| मञ्जूषा- सर्वत्र, तदा, कुत्र, अपि, यदा |
|---|

**12. उचितसंख्यावाचकपदै: रिक्तस्थानानि पूरयत।।(केवलं प्रश्नचतुष्टयम् ) ½ x4=2**

(i) संस्कृतभाषायाः-------------- रूपे स्तः।

(i) द्वौ (ii) द्वयो: (iii) द्वे

(ii) क्रीडाङ्गणे -------------- बालकाः खेलन्ति। (4)

(i) चत्वारः (ii) चतस्रः (iii) त्वारि

(iii) वृक्षात् --------------- पत्राणि पतन्ति। (3)

(i) त्रयः (ii) त्रीणि (iii) तिस्रः

(iv) गुरुकुले-------------- (28) ऋषयः निवसन्ति।

(v) आकाशे-------------- खगाः उत्पतन्ति। (36)

**'घ' भाग: (पठितावबोधनम्) 30 अङ्का:**

**13. अधोलिखितं गद्यांशं पठित्वा प्रदत प्रश्नानां उत्तराणि संस्कृतेन लिखत-**

अत्रान्तरे विष्णुशर्मनामा महापण्डितः सकलनीतिशास्त्रतत्त्वज्ञः बृहस्पतिः इव अब्रवीत् - 'देव! महाकुलसम्भूता एते राजपुत्राः तु मया नीतिं ग्राहयितुं शक्यन्ते ।' अतोऽहं षण्मासाभ्यन्तरे भवत्पुत्रान् नीतिशास्त्राऽभिज्ञान् करिष्यामि। राजा सविनयं पुनरुवाच- कोऽत्र संदेहः ? कीटोऽपि सुमनः संगादारोहति सतां शिरः ।

अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥

तदेतेषाम् अस्मत्पुत्राणां नीतिशास्त्रोपदेशाय भवन्तः प्रमाणम् इति उक्त्वा तस्य विष्णुशर्मणः करे बहुमानपुरः सरं पुत्रान् समर्पितवान् ।

ततः विष्णुशर्मा पशु-पक्षि-जन्तूनां मनोरञ्जकाभिः, प्रेरणाप्रदाभिश्च कथाभिः तान् राजकुमारान् शिक्षितवान्। एतासां कथानां सङ्कलनमेव 'हितोपदेशः' नामकः ग्रन्थः प्रसिद्धः जातः।

**I.एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्) ½x2-1**

(i) बृहस्पतिः इव कः अब्रवीत् ?

(ii) कोटोऽपि कस्य संगात् सताम् शिरः आरोहति ?

(iii) राजा स्वपुत्रान् कस्य करे समर्पितवान् ?

**II. पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वयम्)** **2x1-2**

(i) विष्णुशर्मा किम् उवाच ?

(ii) राजा सविनयं पुनः किम् उवाच ?

(iii) विष्णुशर्मा काभिः राजकुमारान् शिक्षितवान् ?

**III.निर्देशानुसारम् उत्तरत-(केवलं प्रश्नद्वयम्)** **2x1-2**

(i) सकलनीतिशास्त्रतत्त्वज्ञः कस्य विशेषणम् ?

(क) राज्ञः (ख) विष्णुशर्मणः (ग) पुत्राणाम् .

(ii) **'शिक्षितवान्'** इति क्रियायाः कर्तृपदं किम् ?

(क) विष्णुशर्मा (ख) ततः (ग) तान्

(iii) **'हितोपदेशः'** इति कर्तृपदस्य क्रियापदं किम् ?

(क) नामकः (ख) ग्रन्थः (ग) जातः

**14. अधोलिखितं पद्यांशं पठित्वा प्रदतप्रश्नानां उत्तराणि संस्कृतेन लिखत-**

(क) पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥ 1 ॥

(ख) यदि सत्सङ्गतिरतो भविष्यसि भविष्यसि ।
अथ दुर्जनसंसर्गे पतिष्यसि पतिष्यसि ।। 2 ।।

**I. एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्)** **½ x2-1**

(i) कैः प्रस्तरखण्डेषु रत्नसंज्ञा विधीयते ?

(ii) जनाः कुत्र पतिष्यन्ति ?

(iii) पृथिव्यां कति रत्नानि सन्ति ?

**II. पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वयम्)** **2 x1-2**

(i) पृथिव्यां त्रीणि रत्नानि कानि सन्ति ?

(ii) सत्संगतौ किं भविष्यति ?

(ii) जना: कथं सफलता: भविष्यन्ति?

**III.निर्देशानुसारम् उत्तरत-(केवलं प्रश्नद्वयम्)** **2x1-2**

(i) **'प्राज्ञैः'** इति पदस्य विलोमपदं श्लोकात् चित्वा लिखत।

(क) जलै: (ख) मूढैः (ग) सुजनै:

(ii) **'सलिलं'** इत्यर्थे श्लोके किं पदं प्रयुक्तं ?

(क) रत्नानि (ख) अन्नं (ग) जलं

(ii) **'कुसंगे'** इत्यर्थे किं पदं प्रयुक्तम्?

(क) दुर्जन: (ख) सुजन: (ग) दुर्जनसंसर्गे

15. **अधोलिखितं नाट्यांशं पठित्वा प्रदत प्रश्नानां उत्तराणि संस्कृतेन लिखत-**

विरम्यतां प्रभो। विरम्यताम् ।

प्रतापः- श्रुतपूर्व इव स्वरः । (सैनिकं प्रति) वृक्षम् आरुह्य दृश्यतां कः एष शब्दापयति?

सैनिकः- (निपुर्ण निरीक्ष्य) महाराज। मेवाडमन्त्री भामाशाहः खलु एषः।

प्रतापः- अये। भामाशाहः आगतः। कथमस्माकं दौर्भाग्यं भवताऽपि परिज्ञातम् ।

(भामाशाहः धनराशिमादाय आयाति)

भामाशाहः- (सप्रणामम्) अन्नदातः । सेवकं परित्यज्य कुत्र प्रस्थितो भवान् ?

प्रतापः- (दीर्घ निःश्वस्य) न क्वापि बन्धो! गन्तुमपि न शक्यते। धनसेनयोः अभावे देशरक्षणाय पर्याकुलाः स्मः। भवतः चिन्तातुरता परिज्ञाय भरनमिव में हृदयम्। (धनराशिम् निर्दिश्य) इयं सम्पत्तिः खलु कस्मै प्रयोजनाय? ईदृशे एवं कर्मणि अस्याः उपयोगः श्रेयान्।

भामाशाहः- यद्येवं तर्हि गृह्यताम्। त्रोट्यतां पारतन्त्र्य श्रृङ्खलाः स्वकीयैः लौहबाहुभिः। स्वतन्त्रः क्रियतां स्वदेशः।

(धनराशिम् प्रतापचरणयोः अर्पयति)

प्रतापः- (साश्चर्यम्) किमिदं भवान् करोति। नाहं दत्तां सम्पत्तिं पुनः आददामि

भामाशाहः- (सविनयम्) गृह्यतां भगवन्। देशं धर्म च रक्षितुम्।

प्रतापः- धन्योऽसि मन्त्रिवर्य। त्वदीया जननी धन्या। सुकुले जातोऽसि।

**I. एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्)** **½ x2-1**

(i) केन प्रतापस्य दौर्भाग्यं परिज्ञातम् ?

(ii) धनराशिमादाय कः आगच्छति?

(iii) पारतन्त्र्यश्रृङ्खलाः काभिः त्रोट्यताम् ?

**II. पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वयम्)** **2 x1-2**

(i) भामाशाहः धनराशिं कुत्र अर्पयति ?

(ii) प्रतापस्य चिन्तातुरताम् परिज्ञाय कस्य हृदयं भग्नमिव अभवत् ?

(iii) वृक्षम् आरुह्य कः पश्यति ?

**III.निर्देशानुसारम् उत्तरत-(केवलं प्रश्नद्वयम्)** **2 x1-2**

(i) **'श्रुतपूर्वः'** इति कस्य विशेषणम् ?

(क) स्वरस्य (ख) नृपस्य (ग) जनस्य

(ii) **'ईदृशे एव कर्मणि अस्याः उपयोगः श्रेयान्'** इत्यस्मिन् 'अस्याः' इति

(क) धनाय (ख) जनाय (ग) धनराश्यै

(iii) संवादे **'प्रस्थितः'** इति क्रियापदस्य कर्तृपदं किम् ?

(क) त्वम् (ख) भवान् (ग) सेवकं

**16. अधोलिखितं रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -** **1 x5-5**

(i) पृथिव्यां त्रीणि रत्नानि भवन्ति।

(ii) मूढाः पाषाणखण्डेषु रत्नसंज्ञा कुर्वन्ति।

(iii) दुष्टानां संगतेः पतिष्यति एव।

(iv) आलस्यं विहाय पुरुषार्थः विधेयः ।

(v) भामाशाहः धनराशिम् प्रतापचरणयोः अर्पयति।

(vi) भामाशाहः आगतः।

**17. अधोलिखितं मञ्जूषायाः उचितैः पदैः अन्वयः लिख्यताम् -** **½ x4-2**

गच्छन् पिपीलको याति योजनानां शतान्यपि ।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ॥

**अन्वयः**- गच्छन् (i)------------ योजनानां (ii)----------- अपि याति (अस्य विपरीतं) (iii)------------ वैनतेयः अपि (iv)------------ पदम् न गच्छति ।

| |
|---|
| मञ्जूषा - शतानि, अगच्छन्, पिपीलिकः, एकम् |

**अथवा**

सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम् ।
असद्भिः शपथेनापि जले लिखितमक्षरम् ॥

**भावार्थः**- अस्य भावोऽस्ति-यत् सज्जनाः (i)--------- रूपेण अपि यत् कथयन्ति तत् पाषाणे लिखितम् (ii) ----------- इव अपरिवर्तनीयं भवति। परं (iii) ----------- शपथपूर्वकम् अपि गम्भीरः भूत्वा यदपि कथयन्ति तत् जले (iv) ------------ अक्षरम् इव महत्त्वहीनं भवति। अतः दुर्जनमिव कदापि न भवितव्यम्।

| |
|---|
| मञ्जूषा - लिखितम्, सामान्य, दुर्जनाः, अक्षरम् |

**18. अधोलिखितं प्रसङ्गानुकूलम् (केवलं प्रश्नचतुष्टयम्)** **½ x 4-2**

| | |
|---|---|
| (i) सुमनः | (क) भूमौ |
| (ii) अश्म | (ख) पाषाण: |
| (iii) पृथिव्यां | (ग) मूर्खै: |
| (iv) मूढैः | (घ) तरुम् |
| (v) वृक्षम् | (ङ) पुष्पम् |

**19.** अत्र तु दैवम् कारणमिति न उचितम्, अतः सर्वथा दैवम् ----------- च विहाय पुरुषार्थः विधेयः। एतत् चिन्तयित्वा राजा पण्डितसभां ------------- । राजा उवाच- 'भोः भोः पण्डिताः ! श्रूयतां मम वचनम् - अस्ति कश्चिद् एवम्भूतो विद्वान् यो मम पुत्राणां नित्यम् उन्मार्गगामिनाम् ------------ नीतिशास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थः ? अत्रान्तरे विष्णुशर्मनामा ---------- महापण्डितः सकलनीतिशास्त्रतत्त्वज्ञः बृहस्पतिः इव अब्रवीत् - 'देव! महाकुलसम्भूता एते राजपुत्राः तु मया नीतिं ग्राहयितुं शक्यन्ते ।' अतोऽहं षण्मासाभ्यन्तरे भवत्पुत्रान् नीतिशास्त्राऽभिज्ञान् करिष्यामि। राजा ------------ पुनरुवाच- कोऽत्र संदेहः ?

कीटोऽपि ---------- संगादारोहति सतां शिरः ।
अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥

तदेतेषाम् अस्मत्पुत्राणां नीतिशास्त्रोपदेशाय भवन्तः ------------- इति उक्त्वा तस्य विष्णुशर्मणः ----------- बहुमानपुरः सरं पुत्रान् समर्पितवान् ।ततः विष्णुशर्मा पशु-पक्षि-जन्तूनां मनोरञ्जकाभिः, प्रेरणाप्रदाभिश्च कथाभिः ---------- राजकुमारान् शिक्षितवान्। एतासां कथानां सङ्कलनमेव ------------- नामकः ग्रन्थः प्रसिद्धः जातः ।

| |
|---|
| मञ्जूषा - आलस्यं , 'हितोपदेशः' , कारितवान् , करे , सविनयं<br>अनधिगतशास्त्राणाम् , प्रमाणम् , इदानीं , सुमनः , तान् |